International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2018; 4(3): 86-90
© 2018 IJSR
www.anantaajournal.com
Received: 18-03-2018
Accepted: 19-04-2018

**लङ्क.पार्थ सारथिः**
शोध छात्र, डा.डी.यन्. दीक्षित, हैदराबाद तेलंगना, भारत

Correspondence
**लङ्क.पार्थ सारथिः**
शोध छात्र, डा.डी.यन्. दीक्षित, हैदराबाद तेलंगना, भारत

# श्रीवादिराजतिर्थानां जीवितस्य साहित्यस्य परिचयम्

**लङ्क.पार्थ सारथिः**

संस्कृतसाहित्ये वेदान्तिनः अपि बहूनि काव्यानि रचयामासुः। वेदान्ते अव्दैतं,विशिष्टाव्दैतं, व्दैतमिति त्रिस्त्रः शाखाः दृश्यन्ते। तानि सिध्दान्तानि यद्यपि प्राचीनानि तथापि तेषां प्रवर्तकैरेव नाम्ना विख्यातानि यथा– 1. शङ्कराचार्यः-अव्दैतवेदान्त प्रवर्तकाः 2. रामानुजाः–विशिष्टाव्दैतवेदान्त प्रवर्तकाः 3. मध्वाचार्याः - व्दैतवेदान्तस्य प्रवर्तकाः इति प्रसिध्दाः। व्दैताचार्याः बहवःश्रीमन्नारायणं नायकं कृत्वा बहूनि काव्यानि रचयामासुः।यथा - सुधीन्द्रयतीन्द्रः सुभद्रापरिणयं, श्रीवादिराजतीर्थः रुक्मिणीशविजयः इत्यादीनि।
रुक्मिणीशविजयकाव्यं माघकाव्यवत् महा काव्येषु गणयितुं योग्यं कदाचित् माघकाव्यमपि अतिशयितेति निरूपिका एका कथा अपि श्रीवादिराजगुरुतीर्थामृते दृश्यते। पुण्यपुर्यां श्रीकृष्ण नायकाश्रितेषु काव्येषु किं उत्तममिति स्पर्धा आसीत्। माघकाव्यं उत्तममिति केचिदूचुःतथा अपि एकोनविंशदिनाभ्यन्तरे ततोप्यधिकं काव्यं करणीयमिति वादिरादस्य मतिरासीत्।
माघकाव्यं गजाधिष्ठितं मान्यते इति शृत्वा वादिराजः अपि पण्डितान् कश्चित् समयं ययाचे ततोपि उत्तमं काव्यं रचयितुं शक्नोमि इति पण्डितान् उक्तवान्। पण्डितपरिषदपि अनुज्ञां दत्तवती ततः वादिराजः एकोनविंशति दिनेषु एकोनविंशति सर्गात्मकं महाकाव्यं निर्माय दर्शितवान्। एकैकस्मिन् दिने एकैकः सर्गः इति क्रमेण काव्यं रचितं विव्दत्परिषदपि

माघकाव्यात् रुक्मिणीशविजयकाव्यं उत्तमं श्लाघितवती। एषा कथा वादिराजगुरुवरचरितामृते वादिराज गुणरत्नमालायां च दृष्टा।
श्लोकाः ---

ततः पुण्यपुरीं प्राप्तो भेरीताडनपूर्वकम् ।
काव्यश्रेष्ठं माघकाव्यं गजमूर्धिनि पूज्यते ।।

इत्याघोषितमाकर्ण्य सभापतिमवोचत।
अस्मत्पुरे महाकाव्यमेकं श्रेष्ठं प्रकाशते ।।
दीयते समयः कश्चिद्दर्शयिष्ये परीक्ष्यताम्।
अङ्गीकुर्वति विज्ञौघे गुरुरेकोनविंशता।।
दिवसैरेकदिवसे ह्येकसर्गक्रमेणः सः ।
रुक्मिणीशमहाकाव्यं निर्ममे सुरसारकम्।।
अवेक्षणाय विदुषां संसदं प्रेषयत् सुधीः।
परिषत् सा परीक्ष्याथ विस्मितानन्दपूरिता ।।
रुक्मिणीशमहाकाव्यमुत्तमं माघतोपि च ।
इत्याघोष्य च सम्मान्य प्रार्चयत् कविसत्तमम्।।
कवीनां कुलमध्ये हि तिलकोयमिति प्रथाम्।
ख्यापयामास विदुषां परिषद्गुणमोदिनी।।
सोदाभूपोपि माघादेर्मत्वा कोटिगुणाधिकम्।
आरोप्यकरिणः पृष्ठेमानयत् प्रतिपत्तनम् ।।
सुपर्वापाः सुपर्णाद्या गन्धर्वा मुनयोपिहि ।
स्वस्वलोकसभास्वेतत् पूजयामासुरादरात्।।

**वादिराजकालः**

वादिराजः मध्वमतानुयायी वेदान्ती परिव्राजकश्च। श्रीसोदेमठस्य अनुयायी आसीत् सोदेमठः मध्वाचार्य स्थापितेषु अष्टसु उडिपी पीठेषु अन्यतमः।
वादिराजः व्यासराजस्यानन्तरकालिकः इति ज्ञायते।पुरन्दरदासगीतानुसारेण वादिराजः व्यासराजस्य शिष्यः।

सन्तश्रीविजयीन्द्र वादिराजरेम्ब सच्छिष्यरन पडेढु।
विजयीन्द्र सन्त वादिराज गोविन्द पुरन्दररिन्तु सच्छिष्यरन् पडेढु।।

हुविनकरे ग्रामः कुम्बाशी समीपे वर्तमानः वादिराजस्य जन्मस्थानश्च सामवेद शाखाध्यायी रामाचार्यः तस्य पिता, गौरीदेवी माता, वादिराजः इति अस्य सन्यासाश्रनाम पूर्वाश्रमनामवत् भूवराहः। वादिराजः स्वस्य अष्टमे वर्षे वागीशतीर्थेन दत्त सन्यासाश्रमः। विद्यानिधितीर्थस्य वागीश तीर्थस्य च बहून् ग्रन्थान् अधीतवान्। वादिराजः विंशति अधिकवर्षायुष्कः (120) बृन्दावनं प्रविवेश अर्थात् मोक्षं प्राप्तवान्।सोडा नामक ग्रामे मुक्तिं प्राप्तवान् स च ग्रामः उत्तर कर्णाटकमण्डले शिरिषी समीपे वर्तते।

वादिराजः पुराणज्ञः पण्डितः क्वचित् भिन्नभिप्रायवान् संघसंस्कर्ता,समर्थशासकः, महाकविः, सम्भषण चतुरः, च आसीत्। स्वप्रत्यर्थिनः जैनशैवअद्वैतवादिनः पराजितवान् कृतवान्।प्रसङ्गाभरणतीर्थ, सर्वज्ञकल्प, षडदर्शनषण्मुख,कविकुलतिलक इत्यादीनि कानिचन वादिराजकर्तुकानि।वादिराजस्य शिष्याः अद्यतनगुजरात् राष्ट्रे दक्षिणंदेशे उत्तरदेशे च व्याप्ताः वर्तन्ते।उडिपी क्षेत्रस्य व्दैवार्षिकपर्यायेषु वादिराजः पञ्चपर्यायान् निरूढवान्।अष्टानां मठानां व्दौ व्दौ वर्षौ एकैकशः पर्यायः इति पुनरावृत्तिः पर्यायस्य षोडशवर्षे भवति। प्रसिध्द हरिदासौ पुरन्दरदासः कनकदासः वादिराजस्य समकालिकाः । कनकदासः वादिराजं स्वमार्गदर्शकं मनुते। मोहनतरङ्गिण्यां त्रिविक्रमदासस्य दासः इति प्रशंसा दृश्यते

धर्मस्थलक्षेत्रे वर्तमानं शिवलिङ्गं वादिराजेनैव प्रतिष्ठितम्। प्रसिध्दं ओदमिश्रं हयग्रीवः वादिराजेनैव प्रथमतया परिवेषितः। हयग्रीवस्य प्रसादेन लब्धमन्ननिमिति हेतोः ओदनविशेषस्य नाम हयग्रीवं स्यात्।चणकधान्यं गुडमिश्रितं कृत्वा क्रियमाणः पाकविशेषः हयग्रीवः वादिराजः चणकान् गुडमिश्रितान् कृत्वा कृष्णाय निवेदयितुं नयतिस्म।वादिराजस्य शिरसिस्थितं पाकं हयग्रीवं तमनुसरन् स्वयं भक्षितवान् इति कथा मध्वसंप्रदाये प्रसिध्दा।ततः तत्पाकस्य हयग्रीवनाम सार्थकम्।
कृष्णदेवरायस्य भ्राता अच्युतदेवरायः वादिराजस्य शिष्यः अच्युतराजः सजीवः बृन्दावनं प्रविष्ठवान् इति कथा श्रूयते। अतः वादिराजस्य कालः 1481 आरभ्य 1601 इति ज्ञायते । व्यासराजस्य अनन्तरवर्ती इति हेतोः 1539 वत्सर अनन्तरं वादिराजः प्रसिध्दो बभूव।

वादिराज साहित्यस्य शताधिक ग्रन्थमितत्वात् प्रस्तुत शोधनिबन्धः " रुक्मिणीशविजयः" । अतः प्रथमं तत्काव्यस्य परिचयः अनन्तरं वादिराज काव्यान्तराणां ग्रन्थान्तराणां च परिचयः क्रियते।

**वादिराजस्य देश**

उडिपि क्षेत्रस्य पर्यायेषु अष्टौ मठानि प्रसिध्दानि तेषु "हुविनकरे" इति ग्रामे परशुराम क्षेत्रेषु अन्यतमे "कुम्भस्" इति वर्तिनि वादिराजस्य जन्माभूत्।अयं च ग्रामःकर्णाटका कुन्दापूर मण्डले वर्तते। अस्य पितरौ रामाचार्यः गौरीदेवी रामाचार्यः साम वेदाध्यायी वादिराजस्य पूर्वाश्रमनाम "भूवराहः" ।

**वादिराजस्य विद्याभ्यास**

गर्भाष्टमे उपनीतः भूवराहः वागीशतीर्थात् विद्यानिधितीर्थात् च विद्यां अधिजगाम।वादिराजः न केवलं शास्त्रेषु किन्तु संगीतशास्त्रे,गाने च प्रवीणः आसीत्। संघ संस्कर्ता च आसीत्। बहून् जैनाचार्यान् शैवान् अव्दैतवेदान्तिनश्च वादे जितवान्।सोढे प्रान्त शासकः "अरसर्पनायकः" तस्य शिष्यः अनुचरश्च आसीत्। कृष्णदेवरायस्य भ्राता अच्युतदेवरायः अपि वादिराजस्य शिष्यो बभूव।

**वादिराजस्य बिरुदानि**

प्रसङ्गाभरणतीर्थः,
सर्वज्ञकलाः,षट्दर्शनषण्मुखः,कविकुलतिलकः च।

**कथासंग्रहः ---- रुक्मिणीशविजयः**

रुक्मिणीशिविजयकाव्ये श्रीमद्भागवत दशमस्कन्द कथायाः एकदेशः इतिवृत्तरूपेण स्वीकृतः। भागवतदशमस्कन्दे एकोनपञ्चाशत् अध्यायः पूर्वभागः इतरे एकपञ्चाशत् अध्यायाः उत्तरभागः इति व्यवह्रीयते। जरासन्धं प्रतार्य बलरामकृष्णौ प्रश्रवणगिरेः अपक्रान्तं मधुरां प्रविश्य द्वारकां निर्माय तत्र प्रविष्ठौ। श्रीकृष्णः स्वजनस्य योगक्षेमं विचारयितुं अक्रूरं हस्तिनपुरं प्रेषितवान् तावत् कथावान् दशमस्कन्दपूर्वार्थः ततः पञ्चपञ्चाशे अध्याये प्रद्युम्नस्य जननं उपवर्णितम्।प्रद्युम्नः रुक्मिपुत्रीं रुक्मवतीं परिणीतवान् तयोः पुत्रः अनिरुध्दः। अनिरुध्दस्य उषाभिधायां कन्यायां वज्रनामकः पुत्रः अनिरुध्दस्य बभूव।एवं प्रपौत्र जनन पर्यन्तः कृष्णावतार कथाविशेषः भागवत दशमसर्गशेषात् गृहीतः। अतः श्रीमद्भागवतस्य पञ्चपञ्चाशत् अध्यायाः एव रुक्मिणीसविजयकाव्ये मूलकथारूपेण गृहीता। महाकाव्येषु इतिवृत्तं–

"इतिहासकथोद्भूतं इतरव्दा सदाश्रयं "इति लक्षणमनुसृत्य इतिहासोद्भवं सदाश्रयं वादिराजैः गृहीतम् । अस्मिन् काव्ये एकोनविंशतिसर्गाः 1240 श्लोकाः च वर्तन्ते।

प्रथमसर्गे–श्रीष्णावतारकारणं, कृष्णजन्म गोकुल प्रवेशः च वर्णितः ।

व्दितीयसर्गे - शकटासुरसंहारकथा वर्णिता।

तृतीयसर्गे- यशोदायै विश्वरुप प्रदर्शनान्तकथा वर्णिता।

चतुर्थसर्गे- कालीयमर्थनान्ता कथा वर्णिता।

पञ्चमसर्गो–गोवर्धनोद्धरणान्त कथा ।

षष्ठसर्गादारभ्य - नवमसर्गपर्यन्तं रासक्रीडाः वर्णिता।

दशमसर्गे- कृष्णस्य मधुरा प्रवेशः ।

एकादशसर्गे- कंसवधः।

व्दादशसर्गे- श्रीकृष्णविद्याभ्यासः।

त्रयोदशसर्गे- जरासन्धाभियोगः।

चतुर्दशसर्गाद् आरभ्य षोडशसर्गपर्यन्तं रुक्मिणीकल्याणकथा वर्णिता।

अन्तिमेसर्गे त्रये नाम सप्तदश,अष्टादश,एकोनविंशति सर्गे रुक्मिणीवर्णनं, कृष्णवर्णनं कृष्णमहिमा इत्यादि विषयाः वर्णिताः।

नगरार्णव - महाकाव्यलक्षणं सर्वमपि रुक्मिणीश विजयकाव्ये दृश्यते।

अपि च उपदेशरुपेण तत्र तत्र व्दैतसिध्दान्त निरुपणं कृतमिति व्याख्यातृभिः दर्शितम् ।

यथा- तृतीयसर्गे- 12 श्लोकाः 77,78 p.gs व्यख्यानम्-

श्ललोकः–निद्रामाश्रय कि तदाश्रयफलं भुक्तं व्रजेज्जीर्णतां

निद्रा काम्ब निमीलिताक्षियुगलः प्राज्ञं यदालिङ्गति। अस्त्वेवन्त्विति मुद्रितात्मनयनः स्वाङ्गं समालिङ्य तत्
सर्वं जीर्णमथो दिशति जननीं शंसन्निजं सोवतात् ।।
निद्रेति । हे तात त्वं निद्रां स्वापमाश्रय भजस्वेति। शिशुस्वभावानुसारेण स्वव्यापारेषु प्रतिबन्धं कुर्वन्तं कृष्णं प्रति यशोदावचनम्। हे अम्ब मातः तदाश्रयफलं निद्राश्रयणेन प्रयोजनं किमिति मातरं प्रति कृष्णवचनम्।हे कृष्ण
निद्राश्रयणेन ते भुक्तमन्नं जीर्णतां व्रजेत्। इति पुनर्यशोदावचनम्। हे अम्ब निद्रानाम का कीदृशीति पुनर्मातरं प्रति शिशुवेषानुसारेण नित्यप्रबुद्धतया निद्रा पदार्थमजानतःकृष्णस्य वचनम्। अनेन नित्य प्रबुद्धतया परमात्मनः कृष्णस्य निद्रादि दोषराहित्यं ध्वन्यते।निमीलितं अक्षियुगलं लोचनयुग्मं येन सः तथोक्तः सन् प्राज्ञं हृदि स्थितं प्राज्ञनामकं परमात्मानं आलिङ्गतीति यत् सा निद्रा। " प्राज्ञेनात्मना सम्परिष्वकर्ता न बाह्यं किञ्चित् वेदेति" शृतेः इति पुनर्मातुवचनम्।एवमस्त्विति उक्तनिद्राश्रयणं मया क्रियत इति मुद्रिते निमीलिते आत्मनो नयने येन स तथोक्तः सन् स्वाङ्गं स्वशरीरं स्वस्वरूपं समालिङ्ग्य स्वस्यैव प्राज्ञत्वादिति भावः ।" नेह नाज्ञास्ति किञ्चन" इत्यादि श्रृतेः तत् प्राक् भुक्तं सर्वं जीर्णमभवत्।अथो अनन्तरं क्षीरादिकं दशेति जननीं मातरं शंसन् वदन् स कृष्णः निजं स्वकीयं भक्तजनमवतात् रक्षतात्।आशिषि लोट्। वाकोवाक्यमलङ्कारः। " उक्तिप्रत्युक्तिचातुर्यं वाकोवाक्यमित्युक्तत्वात्" ।वादिराज गुणरत्नमालायां रुक्मिणीशविजयकाव्यस्य सर्वोत्तमत्वं एवं प्रतिपादितम्।

श्लोकाः

अनन्यसुकरं दिव्यं नानाववृत्तोपशोभतम्।
श्लोषानुप्रासयमकचित्रबन्धविभूषितम्।।
रूपकोल्लेखदृष्टान्तोत्प्रेक्षापह्नुतिदीपकैः।
युक्तिप्रौढोक्तिगूढोक्तिवक्रोक्तिविवृतोक्तिभिः।।
व्याजनिन्दाप्रभृतिभिर्नानालङ्कारमण्डलैः।
विदुषामप्यविदुषां मनोहारिभिरुज्वलैः।।
पूरितं सुरसोपेतं माधुर्यादिगुणान्वितम्।
निरवद्यैः पदैर्वाक्यैः प्रतिश्लोकमलङ्कृतम्।।
मध्वराध्दान्तदुग्धाब्धि (वृ)
स्वृद्धिहेतुसुधाकरम्।
शुध्दमध्वरिसद्भक्तिसिध्दिबुध्दिसमृद्धिदम्।।
विपक्षरूक्षकक्षाख्यकक्षाभक्षाशुशुक्षणिम्।
रक्षोरिक्ष्मेशदीक्षेक्षादक्षशिक्षाविचक्षणम्।।
अखिलोपनिषन्मुख्यग्रन्थसारार्थबृंहितम्।
स्वपक्षसाधकासङ्ख्यन्ययसन्दोहदीपितम्।।
विष्णोस्सर्वोत्तमत्वं सत्प्रमाणैः प्रतिपादयत्।
मनः प्रसादनोपायं सद्यः श्रवणरञ्जनम्।।
कैवल्यवर्त्मपाथेयं ज्ञानविज्ञानसाधनम्।
स रुक्मिणीशविजयाख्यं महाकाव्यमातनोत्।।

**वादिराजस्य ग्रन्थान्तराणि**

वादिराजः मुख्यतया व्दैतवेदान्ती इति हेतोः तन् मतप्रतिपादकाः बहवो ग्रन्थाः तेन विरचिताः। कन्नडभाषायां अपि वादिराजेन बहवो ग्रन्थाः रचिताः। वादिराजग्रन्थेषु "युक्तिमल्लिका" सर्वमहती सा च सौरभ नामकैः पञ्चाध्यायैः विभक्ता यथा 1. गुणसौरभा 2. शुध्दिसौरभा 3. भेदसौरभा 4. विश्वसौरभा 5. फलसौरभा इति।मध्वाचार्यकृत ब्रह्मसूत्रभाष्यस्य अनुव्याख्यानस्यैव इयं विवृतिः।
वाङ्मयस्वभावविभागेन वादिराजकृताः ग्रन्थाः एवं विभज्य विमर्शकैः दर्शिताः।

**1.स्वतन्त्रग्रन्थाः**

1. युक्तिमल्लिका 2. न्यायरत्नावला 3. चक्रस्तुतिः इत्यादयः बहवः ग्रन्थाः सन्ति।

**2. स्वतन्त्रकाव्यानि**

1. रुक्मिणीशविजयः 2. सरस भारती विलासः 3. तीर्थप्रबन्धः 4. कविकदम्बकण्ठभूषा।

**3. स्वतन्त्रस्तोत्राणि**

1. रमेशस्तुतिः 2. श्रीकृष्णस्तवः 3. श्रीरामकवचम् इत्यादयः बहवः स्तोस्त्राणि सन्ति।

**4. स्वतन्त्रग्रन्थाः कन्नड भाषायाम्**

1. वैकुण्ठवर्णने 2. लक्ष्मीशोभने 3. स्वप्नपद 4. केशवनाम इत्यादयः।

एवं शताधिक ग्रन्थकर्तुः वादिराजस्य यशः अद्यापि संस्कृत वाङ्मये सार्वभौमं वर्तते इति न किञ्चिदपि सन्देहः।

इति शम्

उपयुक्तग्रन्थसूची

1. वादिराजगुरुवरचरितामृते वादिराजगुणरत्नमाला -- श्रीवादिराजः।
2. रुक्मिणीशविजयः--- श्रीवादिराजः।
3. श्रीमद्भागवतम् - व्यासः।